क्रं. १२ संस्कृत.

# प्रायश्चित प्रयोग

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीगणेशायनमः ॥ अथस्त्रीकर्तृकप्रायश्चित्तप्रयोगः संभवे भर्तृकायां प्रातःका
ले वा कृतमाध्याह्निकः सायाह्ने गंगादौ शुचिः पवित्रपाणिः द्विराचम्य चतुरः
स्त्रीनेकं वा ध्यात्मविदं ब्राह्मणं पर्षत्त्वेनोपवेश्य कृतस्नाना शक्तौ सत्यां क्लि
न्नवासा अभुंजाना पर्षदं प्रदक्षिणीकृत्य धरण्यां दंडवत् प्रणमेत् ततः
स्तिष्ठेत् ततस्तैः किं ते कार्यमिति पृष्टे गोभूषनिष्क्रयं पर्षदग्रे निधाय
अमुकगोत्रायाः अमुकादायाः मे जन्मप्रभृति अद्यपावत् ज्ञानाज्ञान
कामाकामसकृदसकृत्कृत कायिकवाचिकमानसिकसांसर्गिकस्पृ
ष्टास्पृष्टभुक्ताभुक्तपीतापीतसकृदुपातकातिपातकोपपातकलघुपा
तकसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णक
पातकानां मध्ये संभावितपातकानां निरासार्थं तथामासत्रयपर्यं

प्रा० श्चि०
॥ २ ॥
(2)

तं कारागृहनिवासजनितप्रत्यवायपरिहारार्थं प्रायश्चित्तमुपदिशंतु भवंतः
ब्राम्हणाः उपदिशाम इति ब्रूयुः सर्वधर्मविवेक्तारो गोप्तारः सकला द्विजाः ॥
मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः ॥ १ ॥ मया कृतं महाघोरं ज्ञातमज्ञातं
किल्बिषं ॥ प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ पूज्यैः कृतपवि
त्रोहं भवेयं द्विजसत्तमैः ॥ २ ॥ इति द्विजान् प्रार्थयेत् ततो मामनुगृण्हं
तु भवंतः तैः अनुगृण्हीमः इति ब्रूयुः फलप्राप्त्यर्थं करिष्यमाणस
र्वप्रायश्चित्तांगविहितं निबंधपूजनं सभ्यपूजनं अनुवादकपूजनं
च करिष्ये पुस्तकपूजनं कृत्वा सभ्यपूजनं इदं गोवृषनिष्क्रयद्रव्यं
विष्णुस्वरूपीसभ्येभ्यो ब्राम्हणेभ्यः दातुमहमुत्सृज्ये पापापहमहा
विष्णुः प्रीयतां ततोनुवादकपूजनं महाविष्णुस्वरूपिणे अनुवाद
काय ब्राम्हणाय इदमासनं इति पूजयेत् इमां भक्तिरूपां यथाश ॥ २ ॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

क्तिदक्षिणां तुभ्यमहं संप्रददे ततोनुवादकः अमुकगोत्रायाः अमु
कदायाः तव जन्मप्रभृति अद्ययावत् ज्ञानाज्ञानकामाकामसकृद
सकृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्त
पीतापीतसकलपातकातिपातकोपपातकलघुपातकसंकरीक
रणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णकपातकानां
मध्ये संभावितपातकानां निरसनपूर्वकं पर्षदुपदिष्टेन पंचच
त्वारिंशत्कृच्छ्रात्मकसार्धाब्दप्रायश्चित्तेन प्रतिप्राजापत्यं य
थाशक्ति गोनिष्क्रयद्रव्यदानद्वारा प्राच्योदीच्यांगसहितेन तथा
मासत्रयपर्यंतं कारागृहनिवासजनितप्रत्यवायपरिहारार्थं प्रति
मासं एकैककृच्छ्रप्रायश्चित्तं प्रतिकृच्छ्रं प्रत्याम्नाय गोनिष्क्रयद्रव्य

सं०प्रा०
॥२॥
(3)

दानद्वारा आचीर्णेन तव शुद्धिर्भविष्यति ॥ तेन त्वं कृतार्थो भवसि इ
ति ॥ ततः देशकालौ संकीर्त्य अमुकगोत्रायाः अमुकदासयाः मे जन्म
प्रभृति अद्य यावत् ज्ञानाज्ञान कामाकाम सकृदसकृत् कायिक वाचिक
मानसिक स्पांसर्गिक स्पृष्टास्पृष्ट भुक्ताभुक्त पीतापीत सकल पा
तकातिपातको पपातक उपपातक संकरीकरण मलिनीकरणा
पात्रीकरण जातिभ्रंशकर प्रकीर्णक पातकानां मध्ये संभावित पा
तकानां निरसन पूर्वकं अस्मिन् काले शरीरशुद्ध्यर्थं पंच ~~ख्या~~ चत्वा
रिंशत् कृच्छ्रात्मक सार्धाब्द प्रायश्चित्तं सभ्योपदिष्टं प्रतिप्राजा
पत्य प्रत्याम्नाय गोनिष्क्रय द्रव्य दानद्वारा तथा कारागृहनि
वास जनित प्रत्यवाय परिहारार्थं कृच्छ्रत्रय प्रायश्चित्तं प्रतिकृ २

(3A)

छं प्रत्याम्नाय यथाशक्ति गोनि ष्क्रय द्रव्य दानद्वारा प्राच्योदीच्यांग
सहितं यथाशक्तिकरिष्ये तथा ब्रंम्हदंडं गृहीत्वा यानि कानि च पा
पानि ब्रंम्हहत्या समानि च केशानाश्रित्य तिष्ठंति तस्मात् केशा
न् वपतिष्ये वपनं कृत्वा प्राङ्मुखो द्वादशांगुल दंतकाष्ठेन
आयुर्बलं यशो वर्चः प्रजाः पशून् वसूनि च ब्रंम्ह प्रज्ञां च मेधां
च त्वं नो देहि वनस्पते इति मंत्रेण दंतान् संशोध्य ताद्दशा
न्य काष्ठेन जिव्हाम पि संशोधयेत् अथ दशविध स्नानानि
ततः स्नात्वा भस्म गोमय मृत्तिका भुजल स्नानं पंचगव्य स्ना
नानि कुशोदक स्नानं एवं दशविध स्नानानि विधाय धौ

स॰ प्रा॰ तथासमसीपरिधाय आचम्य देशकालौ संकीर्त्य प्रायश्चित्तांगत्वेन
२ विहितं विष्णुश्राद्धं करिष्ये शालग्रामे दर्भवटौ वा विष्णुमावाह्य षो
डशोपचारैः पंचभिर्वा संपूज्य पापापहमहाविष्णुप्रीत्यर्थं चतुरो
(५) ब्राह्मणान् यथाकालं भोजयिष्ये चतुर्भ्यः च त्वायनान्नानि दातुम
हमुत्सृज्ये पश्चाचतुर्णां ब्राह्मणानां पर्याप्तं यथाशक्तिन्नमेतं नि
ष्क्रयं वा नानानामगोत्रेभ्यो ब्राह्मणेभ्यः दातुमहमुत्सृज्ये पापापहम
हाविष्णुः प्रीयतां कृतप्रायश्चित्तपूर्वांगत्वेन विहितं यथाश
क्ति द्रव्यदान द्वारा अघगोदानं करिष्ये ब्राह्मणपूजनं गोपूजनं
च कृत्वा स्वस्त्यस्तु दी॰ इदं गो॰ द॰ पापापहम॰ यस्मैक॰ गवामंगे
ष्विति श्लोकं पठेत् पुनराचम्य देशकालौ संकीर्त्य प्रायश्चि २

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(5A)

त्तांगत्वेन विहितं शाकलहोमं सकलपापक्षयार्थं ब्राह्मणद्वारा ब्रं
ह्मकूर्चहोमंच तंत्रेण करिष्ये ममानुज्ञया स्थंडिलादि सर्वकर्म
कुरु फल प्राप्त्यर्थं यजमानाज्ञया संकल्पित प्रायश्चित्तांग होमं
कर्तुं स्थंडिलादि सर्वकर्म करिष्ये स्थंडिला ग्निं ध्यानांते स
मिद्वय मादाय फल प्राप्त्यर्थं प्रायश्चित्त होमे देवता परिग्रहा
र्थं मन्वाधानं करिष्ये अस्मिन्नन्वाहिताग्नौ चक्षुषी आज्येने संत
मुक्ता अत्र प्रधानं अग्निं वायुं सूर्यं प्रजापतिं चैताः व्यस्तसमस्त
व्याहृतिभिर्मंत्रैः सप्तविंशति संख्यावृत्तेः अष्टोत्तरशतसंख्या
भिराज्याहुतिभिः यद्वा सप्तावृत्तैरष्टाविंशति संख्याभिरा.
ज्याहुतिभिः तथा पृथिवीं विष्णुं रुद्रं ब्रह्माणं अग्निं सोमं

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

सं० प्रा० सूर्यं प्रजापतिं द्विः अग्निं स्विष्टकृतं एताः एकैकया पंचगव्याहुत्या आ
॥६॥ ज्येण स्विष्टशेषेण स्विष्टकृतमित्यादि समिद्ध्यमनाधाधायं परिसमूह
नादीध्मस्थानांते तृणेण सह पंचगव्यमासाद्याज्यभागांते प्रधान होमः
(5) भूः स्वाहा अग्नय इ० भुवः स्वाहा वायव इ० स्वः स्वाहा सूर्याये० भूर्भुवः स्वः स्वा०
प्रजापतय इ० इत्यन्वाधानानुसारेण होमं कृत्वा वक्ष्यमाणरीत्या पंचगव्यं
कार्यं सुवर्णादिपात्रे वा ताम्रा पः गोमूत्रं त्रिपलं अशक्तेन माषाष्टक परि
मितेन वा गायत्र्या प्रणवेन वादाय ततो गुष्ठार्ध परिमितं षोडश माषमि
तं वा श्वेताया गोमयं गंधद्वारामित्यादाय ततः कपिलायाः पयः सप्त
पलं द्वादश माषमितं वा आप्यायस्वेत्यादाय ततो नीलायाः सप्तपलं
मेव दशमाषमितं वा दधिक्राव्ण इत्यादाय ततः कृष्णाया घृतमेकपलं ॥६॥

माषाष्टकमितं नाघृतं मिमिक्षइत्यादाय ततएकपलं कृशरोदकं माषाष्टक
चतुष्टयपरिमितं आपोहिष्ठेत्यादाय प्रणवेनाऽशोध्य प्रणवेनैवयज्ञि
यकाष्ठेन निर्मथ्य प्रणवेनाभिमंत्र्य सप्तपत्रैर्हरितैः कृशरोदशाहुतीर्जुहुया
(5A) त् एभिर्मंत्रैर्मंत्रोश्च इरावतीधेनुमती० स्वाहा पृथिव्या इदं० इदं विष्णु
र्वि० विष्णव इदं० मानस्तोके० रुद्रायेदं० ब्रह्मजज्ञानं० ब्रह्मण इदं० अग्न
ये स्वाहा अग्नय इदं० सोमाय स्वाहा सोमायेदं० तत्सवितुर्व० सूर्यायेदं० ॐ स्वा
हा परमात्मन इदं० ॐ भूर्भुवः स्वः स्वाहा प्रजापतये इदं० अग्नये स्विष्टकृते
स्वाहा स्विष्टकृत इदं० एवं दशाहुतीर्हुत्वा स्विष्टकृतादि होमशेषं समाप्य
फलप्राश्यार्थं व्रतग्रहणं करिष्ये इति द्विजानापृच्छ्य तैः कुरुष्वेत्यनुज्ञा
तः तूष्णीं सर्वं पिबेत् ततः उदङ्मुख स्त्रिवारमाचामेत् एतच्च ग्रामा

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

स० प्रा०

॥५॥ कृहिः नद्यास्तीरे नक्षत्रदर्शने कार्यं अस्मिन् दिवसे उपवासः शक्तस्यान्यस्य
हविष्याशनं ततः गृहे आगत्य विष्णुं स्मरन् मौनी निशामतिवाह्य प्रभा
त प्रायश्चित्तं संकल्पानुसारेण कृत्वोत्तरांगानि कुर्यात् आचम्य देशकालौ०
(६) इदं स्वार्थद्ध प्रायश्चित्तं कृच्छ्र प्रत्याम्नाय कल्पित गोनिष्क्रय द्रव्यं पापापहं महा
विष्णुप्रीत्यर्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यः दातुमहमुत्सृज्ये आचम्य दे
शका० मया कृतस्य सर्व प्रायश्चित्तस्य उत्तरांगत्वेन विहितं होमं करिष्ये
ब्राह्मणद्वारा करिष्ये क०५ प्रा०स्यर्थं यजमानेन यास संकल्पित उत्तरांगहोमं कर्तुं
स्थंडिलादि सर्वं कर्म करिष्ये पूर्ववत् स्थंडिले अग्निं प्रतिष्ठाप्य पाकयज्ञ
विधिना व्याहृति होमं कृत्वा कर्मशेषं समाप्य उक्तप्रकारेण विष्णुं संपूज्य ॥५॥
ब्राह्मणभोजनं आमं तन्निष्क्रयं वा संकल्प्य गोदानं तन्निष्क्रयं वा दद्यात्
शक्तौ सत्यां दशदानानि कुर्यात् तानि च गोभूतिलहिरण्याज्यं वासो
धान्यं गुडानि च रौप्यं लवणमित्याहुर्दश दानान्यनुक्रमात् द०नी०प०

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com